# श्री हनुमानचालीसा
## (संस्कृत भावानुवाद)

श्रीगुरुपदपद्मरजो धुनोतु मे चित्तमुकुरमालिन्यम्
रघुपतिचरितं चक्षे पुमर्थफलदं हि तद् विमलम् ॥
नूनं बुध्दिविहीनैः स्मर्तव्यः पवननंदनो धीमान्
विद्यां बलं च बुध्दिं प्रयच्छ हनुमन् जहीहि तत्क्लेशान् ॥
जयोऽस्तु हनुमन् वन्दे ज्ञानसिंधो गुणांबुधे
कवीश्वर नमस्तुभ्यं त्रैलोक्यं भ्राजते यतः ॥ १
श्रीरामचंद्रदूतश्रीः अतुल्यबलशेवधिः
अंजनीतनयो नाम्ना विख्यातः पवनात्मजः ॥२
विक्रमो मूर्तिमान् वीरो महान् वज्रांगवान् बली
निहन्ता दुष्टबुध्दीनां साधुबुध्दिमतां सखा॥३
तप्तकांचनवर्षाभपीतवासो विराजते
कुंडलश्रवणो भाति मेधावी कुंचकुंतलः॥४
बिभर्ति वज्रमेकेन ध्वजमन्यकरेण सः
मौंजं यज्ञोपवीतं च स्कंधदेशे दधाति यः॥५
शिवतेजांशसंभूतः केसरीराजनन्दनः
महाप्रतापः तेजस्वी यं कृत्स्नं वन्दते जगत्॥६
विद्यावान् गुणसंपन्नः चातुर्यातिशयान्वितः
रामचंद्रकृते कर्तुं कार्यं किमपि सस्पृहः॥७
रघुनाथचरित्रस्य रसास्वादनलंपटः
रामं सीतां लक्ष्मणं च योऽनिशं ध्याति चेतसा ॥८
आविर्भवति सीतायाः पुरतो लघुरूपधृक्
लंकां ज्वालयितुं धत्ते यो रूपं विकटं महत्॥९
संहर्तुमसुरान् धत्ते रूपं भीमं भयानकम्

रामकार्यं सदा भक्त्या संपादयति सर्वशः॥१०

संजीवनीं समाहृत्य स जीवयति लक्ष्मणम्

हनुमन्तमतो हर्षाद् उरसा श्लिष्यति प्रभुः ॥११

प्रसन्नीभूय रामेण बहुवारं प्रशंसितः

भ्राताऽसि मे प्रिय इति नूनं भरतसन्निभः॥१२

शेषः सहस्त्रशीर्षा ते यशोगाथां प्रगास्यति

बाष्पगद्गदमित्युक्त्वा कंठे जग्राह तं प्रभुः॥१३

ब्रह्मादयो नारदश्च शारदा सनकादयः

सहस्त्रशीर्षसहितास्तथा सप्तर्षयोऽपि ते ॥१४

यमः कुबेरो दिक्पालास्तथा च कविकोविदः

हनुमन् न हि शक्तास्ते यथावत् त्वां प्रशंसितुम्॥१५

तोषयामास सुगीव्रं उपकारेण वानरम्

तं संगमय्य रामेण ददौ राजपदं पुनः ॥१६

बिभीषणस्त्वया दिष्टं मंत्रं सम्यगधीतवान्

ततो लंकापतिपदं तेनोपात्तमिति प्रथा॥१७

सहस्त्रयोजनं दूरे सूर्यबिंबं विराजते

मन्यसे लीलया ग्राह्यं स्वाद्यं तन्मधुरं फलम्॥१८

म्रुद्रिकां रामभद्रस्य मुखे धृत्वा महाकपिः

उल्ललंघ सुखेनाब्धिं अपारं नातिचित्रमित्॥१९

यद् यद् हि कार्यं जगति भाति केनाऽपि दुष्करम्

तत् तद् हि सुकरं नूनं अहो भवदनुग्रहात् ॥२०

दौवारिकोऽसि हनुमन् रामद्वारि निरन्तरम्

नान्तः कोऽपि विनानुज्ञां ते प्रवेष्टुं हि शक्नुते ॥२१

शरण्यं त्वां समापन्ना लभन्ते हि सुखं जनाः

अवति त्वयि रुद्रांश कथं कस्य कुतो भयम्॥२२

तेजो दुर्धर्षमात्मीयं स्वयमेवोपसंहर

सिंहनादेन ते विश्वं अभिद्रवति वेपते॥२३

भूतप्रेतपिशाचाद्याः तत्र नायान्ति कर्हिचित्

नाममंत्रो महावीर इति यत्र प्रगीयते॥२४

नश्यन्ति सकला रोगाः शममायान्ति चापदः

जपतां तु महावीरं हनुमन्तं निरन्तरम्॥२५

प्रणतं संकटाद् आर्तं हनुमान् त्रायते जवात्

साचारोच्चारमनसा तदेकध्यानतत्परम्॥२६

राजराजेश्वरो रामः तपस्वी रघुनंदनः

कार्यं साधयितुं तस्य सदा सिध्दोऽसि सस्पृहः॥२७

अन्यो हनुमते कोऽपि कामान् कामयते भृशम्

तस्मै ददाति कपिराट् आजीवं अमितं फलम् ॥२८

चतुर्युगेषु हनुमन् प्रतापस्ते प्रतिष्ठितः

येन कृत्स्नमिदं नित्यं नूनं विभ्राजते जगत्॥२९

साधूनां त्वं परित्राणं सज्जनानां च रक्षकः

रामस्य दयितोऽसि त्वं असुराणां निषूदनः॥३०

समस्तनिधिसिध्दीनां प्रदाता त्वं भविष्यसि

इत्थं त्वा जननी प्रेम्णा वरयामास जानकी॥३१

निहितं हनुमन् नित्यं त्वयि रामरसायनम्

रघुनाथस्य दास्ये त्वं निहितो भव सर्वदा॥३२

त्वमुद्दिश्य कृतं ध्यानं श्रीरामं प्रति गच्छति

जन्मजन्मान्तरोपात्तं दुःखं विस्मर्यते यतः॥३३

त्वद्भक्ताश्च परं धाम रामस्यान्ते विशन्ति हि

कामयन्ते जनुर्यत्र हरिभक्तिपरायणाः॥३४

कदापि न मनो युंज्याद् अन्यां कामपि देवताम्

एक एव हि सर्वेषां हनुमान् सुखदायकः॥३५

संकटानि विनश्यन्ति पीडा तस्य च हीयते

योऽनन्यमनसा वीरं हनुमन्तं स्मरेद् हरिम्॥३६

जयोऽस्तु हनुमन् स्वामिन् जयोऽस्तु विजयोऽस्तु ते

नान्यः कोऽपि गुरुर्देवः कृपां कुरु ततो मयि॥३७

यः पठेत् शतधा धीमान् श्रध्दया हनुमत्स्तवम्

सर्वबंधविनिर्मुक्तः स महत् सुखमश्नुते॥३८

चत्वारिंशन्मितश्लोकस्तवं पठति मारुतेः

गौरीशसदृशः स स्यात् सर्वसिध्दिसमन्वितः॥३९

अयं हि तुलसीदासः तव शिष्योऽस्ति सर्वथा

कुरुतात् वसतिं नित्यं मच्चित्ते प्रार्थये हरे॥४०

संकटहर्ताऽसि त्वं मंगलमूर्तिस्वरूप पवनसुत

नित्यं सुरेश हृदि मे सह सीतारामलक्ष्मणैरास्स्व॥

इति श्रीहनुमानचालीसास्तवनं समाप्तम्।

*************

वैद्य श्रीनिवास पु. हिर्लेकर

**(By: Vaidya Shriniwas P. Hirlekar)**